उपशास्त्री - II साहित्य - तृतीय - पत्रम्
किरातार्जुनीयम् - महाकाव्यम्
प्रथमः सर्गः

Date ___/___/___

(1) प्र० - पद्य मिदम् व्याख्येयम्।

पुराऽधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीयम् - महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - यं त्वां पूर्वं प्रासादेषु बहुमूल्यशय्यायां शयानं प्रातः वैतालिकाः स्तुतिगानमङ्गलध्वनिभिर्विबोधयन्ति स्म स एव त्वं सम्प्रति कुशस्थलीषु सुप्तः सन्नमङ्गलसूचकैः शृंगालिनीरवैर्निद्रां जहासि, इयं ते दुर्दशा जाता।

व्याख्या - यः = जो (तुम) । महाधनं = बहुमूल्य । शयनं = शय्या में । अधिरूढः = आरूढ़ (सोये) हुए । स्तुतिगीति मंगलैः = (वैतालिकों द्वारा गाये गये) स्तोत्रगानरूप मङ्गल ध्वनियों से । विबोध्यसे = जगाये जाते थे । सः = वही (तुम आज) । अदभ्रदर्भां = बहुत कुशों वाली । स्थलीं = भूमि में । अधिशय्य = सोकर । अशिवैः = अमंगलसूचक । शिवारुतैः = सियारों की बोलियों से । निद्रां जहासि नींद को छोड़ते हो।

Renu Devi
04/11/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No. ______

शास्त्री-II साहित्य

मेघदूतम

लघु-अतिलघूत्तरीयाणि प्रश्नोत्तराणि

प्र०(1) - मेघदूतस्य प्रथमं पद्यं लिखत।

उत्तरम् - कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः,
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

प्र०(2) - मेघदूतस्य प्रथमे श्लोके किमाख्यं वृत्तं विद्यते?

उत्तरम् मेघदूतस्य प्रथमे श्लोके मन्दाक्रान्ता नामकं वृत्तमस्ति

प्र०(3) - मेघदूतस्य प्रथमे श्लोके कोऽलङ्कारो वर्तते?

उत्तरम् - मेघदूतस्य प्रथमे श्लोके शापं प्रति स्वाधिकारात् प्रमत्तः इत्यस्य हेतुतया पदार्थ हेतुक काव्यलिङ्गाख्यो ऽलङ्कारो विद्यते।

प्र०(4) - मेघदूतस्य का व्युत्पत्तिरिति स्वविवेकानुसारेण लिखत?

उत्तरम् - मेघ एव दूतो मेघदूतः - इत्येवं विग्रहेन रूपक समासकरणेना भेदलक्षणया जयमिदं ग्रन्थस्य वाचको भवति।

मेघो दूतो यस्मिन् तत् मेघदूतम् - इत्येवंविग्रहेन बहुव्रीहि करणेन पद्यमिदं काव्यस्य वाचकं भवति।

Renu Devi
04/11/20
राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया।

शास्त्री - I साहित्य

अभिज्ञानशाकुन्तलम्

अतिलघूत्तरीयानि प्रश्नोत्तराणि

प्र०(1) - परभृताः कमन्यैर्द्विजैः पोषयन्ति ?

उत्तरम् - परभृताः स्वमपत्यजातमन्यैर्द्विजैः पोषयन्ति ।

प्र०(2) - परीक्ष्य किं कर्तव्यम् ?

उत्तरम् - परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रहः ।

प्र०(3) - अज्ञात हृदयेषु किं वैरी भवति ?

उत्तरम् - अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम् ।

प्र०(4) - पतिकुले कस्य दास्यमपि क्षमम् ?

उत्तरम् - पतिकुले स्त्रीजनस्य दास्यमपि क्षमम् ।

प्र०(5) - वशिनां कीदृशी वृत्तिः ?

उत्तरम् - वशिनां परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ।

प्र०(6) - मातलिः कस्य सारथिः ?

उत्तरम् - मातलिः इन्द्रस्य सारथिः ।

प्र०(7) कः सपत्नीकः तपस्यति ?

उत्तरम् - सुरासुरगुरुः मारीचः सपत्नीकस्तपस्यति ।

प्र०(8) - कः नामौषधिः सर्पो भूत्वा दशति ?

उत्तरम् - अपराजिता नामौषधिः सर्पो भूत्वा दशति ।

प्र०(9) - अपराजिता नामौषधिः कदा केन दत्ता ?

उत्तरम् - अपराजिता नामौषधिः सर्वदमनस्य जातकर्मसमये भगवता मारीचेन दत्ता ।

प्र०(10) - शकुन्तलायाः दुष्यन्तेन पुनर्मिलनं कस्याश्रमेऽभवत् ?

उत्तरम् - शकुन्तलायाः दुष्यन्तेन पुनर्मिलनं मारीचस्याश्रमेऽभवत् ।

Renu Devi
04/11/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No.